॥ श्रीः ॥

# ॥ लक्ष्मीनृसिम्हकरावलम्बन स्तोत्रम् ॥

श्रीमत्पयोनिधिनिकेतन चक्रपाणे
भोगीन्द्रभोगमणिराजितपुण्यमूर्ते ।
योगीश शाश्वत शरण्यभवाब्धिपोत
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ १

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि-
सङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरोरुहराजहम्स
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ २

संसारदावदहनाकुलभीकरोरु-
ज्वालावलीभिरतिदग्धतनूरुहस्य ।
त्वत्पादपद्मसरसीं शरणागतस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ ३

संसारजालपतितस्य जगन्निवास
सर्वेन्द्रियार्थबडिशाग्रझषोपमस्य ।
प्रोत्कम्पितप्रचुरतालुकमस्तकस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ ४

संसारकूपमतिघोरमगाधमूलं
सम्प्राप्य दुःखशतसर्पसमाकुलस्य ।
दीनस्य देव कृपया पदमागतस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ ५

संसारभीकरकरीन्द्रकराभिघात-
निष्पीड्यमानवपुषः सकलार्तिनाश ।
प्राणप्रयाणभवभीतिसमाकुलस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। ६

संसारसर्पविषदिग्धमहोग्रतीव्र-
दंष्ट्राग्रकोटिपरिदष्टविनष्टमूर्तेः ।
नागारिवाहन सुधाब्धिनिवास शौरे
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। ७

संसारवृक्षमघबीजमनन्तकर्म-
शाखायुतं करणपत्रमनङ्गपुष्पम् ।
आरुह्य दुःखफलिनं पततो दयालो
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। ८

संसारसागरविशालकरालकाल-
नक्रग्रहग्रसितनिग्रहविग्रहस्य ।
व्यग्रस्य रागनिचयोर्मिनिपीडितस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। ९

संसारसागरनिमज्जनमुह्यमानं
दीनं विलोकय विभो करुणानिधे मां ।
प्रह्लादखेदपरिहारकृतावतार
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। १०

संसारघोरगहने चरतो मुरारे
मारोग्रभीकरमृगप्रचुरार्दितस्य ।
आर्तस्य मत्सरनिदाघसुदुःखितस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ ११

बध्वा गले यमभटा बहु तर्जयन्तः
कर्षन्ति यत्र भवपाशशतैर्युतं मां ।
एकाकिनं परवशं चकितं दयालो
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ १२

लक्ष्मीपते कमलनाभ सुरेश विष्णो
यज्ञेश यज्ञ मधुसूदन विश्वरूप ।
ब्रह्मण्य केशव जनार्दन वासुदेव
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ १३

एकेन चक्रमपरेण करेण शङ्ख-
मन्येन सिन्धुतनयामवलम्ब्य तिष्ठन् ।
वामेतरेण वरदाभयपद्मचिह्नं
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ १४

अन्धस्य मे हृतविवेकमहाधनस्य
चोरैर्महाबलिभिरिन्द्रियनामधेयैः ।
मोहान्धकारकुहरे विनिपातितस्य
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ॥ १५

प्रह्लादनारदपराशरपुण्डरीक-
व्यासादि भागवतपुङ्गवहृन्निवास ।
भक्तानुरक्तपरिपालनपारिजात
लक्ष्मीनृसिम्ह मम देहि करावलम्बम् ।। १६

लक्ष्मीनृसिम्हचरणाब्ज मधुव्रतेन
स्तोत्रं कृतं शुभकरं भुवि शङ्करेण ।
ये तत्पठन्ति मनुजा हरिभक्तियुक्ता-
स्ते यान्ति तत्पदसरोजमखण्डरूपम् ।। १७

इति श्रीमच्छङ्कराचार्यप्रणीतं लक्ष्मीनृसिम्हकरावलम्बन स्तोत्रं सम्पूर्णम् ।।

